सौ॰टी॰ सुः॥ब्रह्मणोनिंदांकृत्वातरश्चमाणंप्राप्यरुद्रलिंकरंगतःतेनालिंगितुमारब्धोपि
५७ पिशाचादिसखःश्मशानवासीनमयालिंगनीयःइतितन्निंदामकरोत्।त्रिशूलेन
रुद्रेणाभिहंतुमुपक्रांतः वैकुंठेलक्ष्मीसहसुप्तस्यविष्णोर्वक्षसिचरणघातमदात् ज
।तदाभगवताबहुमानंमहोत्कगेरेमदीयवक्षसितपादुर्वैस्पततवपादस्पर्शोमिहद्दु
ःखमुत्पन्नमपिष्यतीतिअभिसंधायतत्सद्दसेवाकर्मचारब्धंततोतिरस्मावंतंसर्वा 96
धिकमेवममंस्तेतिपौराणिकीकथा॥८७॥परंतेकांतीनां॥८८॥हेदेवितवपदं
पदार्थंकांतीनांपदंस्थानंविपदामपरमस्थानंकठिनायाकमठीकच्छपीतस्यायस्प ५७
पृष्ठपालंतस्यतुलांसाम्यंसंस्पृशिःकथंनीतंपदस्यातिकोमलत्वात्॥उपयमनका

ले विवाहकाले दयमानेन दयायुक्तेन मनसा करणभूतेन पुरभिदा शिवेन बाहुभ्या।
चि मादाय दृषदि विवाहकौ[illegible]ते पाषाणे तदुपरि पदं कथं न्यस्तमिति स्मर्यः ॥ विष्णुपदे
॥ देवाश्चास्मिन्वसंतीति देवि सकलदेवाश्रयमिति च पदविशेषणं दृशादि सत्ते सिंह
सने च पदं शिवेन स्थापितमित्यागमः ॥८८॥ नरवैर्नीकस्त्रीणां ॥८९॥ हे चंडि ते तव
चरणौ दिव्यानां तरुणीनां कल्पवृक्षाणां हसतः वस्वस्य गुणाधिक्यादिति भावः ॥ तरु
णामिति कर्मणि षष्ठी नरवैर्नीदृशैः नाकस्त्रीणां स्वर्गांगनानां करकमलसंकोचे हस्त
कमलमुकुलीकरणे अशिशिरभ्रंश्यमानैः चरणमेइति भावः ॥ हास्यहेतुमाह पल्ल
नीति ॥ नवदलरूपहस्तायेण स्वः स्थः स्वर्गस्थितम्भः ॥ सपचे धनादिमंतं स्वः स्थे

सौं·र्य· न्तःसुखस्थितेभ्यःफलानिदधतांतरूणामित्यस्यविशेषणंचरणौविशिनष्टिदरि
५८ द्रेभ्योदुर्गतेभ्यःमहांसंपदंश्रियंनिःसीमनिशामविरतमह्नायझटितिददतौप्रयच्छं
तौ।विस्मयहेतू॥चंद्रः।प्रचंडाःफलदानेनरूढाइत्यादेवाःसन्नताःसंतीतिचंडीस्म
श्चासौचरणस्तौचंडिचरणौस्वोटफलदेवाश्रिताविस्पर्धः॥८९॥कदाकालेमातः।
९०॥हेमातःकथयविद्यार्थीसन्तवचरणनिर्णेजनजलंचरणक्षालनजलंकदा। 97
कालेपिबेयंकीदृशंकलितःसंक्रांतःप्रक्षालनवेलायामलक्तकरसोयस्मिन्तत्प्रकृसौ
स्वभावतएवमूकानांवक्तुमशक्तानांकवितायाःकाव्यस्यकारणताहेतुःयत्संबंधिनः ५८
सरस्वत्याःमुखकमलतांबूलरसतांकलरसतांवदनकमलतांबूलरागशोभामाध

CC-0. In Public Domain. Digitization by eGangotri

तेकरोतीत्यर्थः ॥ इति केचित् । विष्णुपक्षे ॥ मातः लक्ष्मीवाण्यामुखकमलतां कूलरस
तामाधत्ते इत्यर्थः ॥ यद्वा । अमा इति अतइतिपदच्छेदः अद्यसाप्रस्तुतिरूपयामवार्त्ता
अमासहवाणीसरस्वतीमुखकमलरसतांयदाधत्ते अतोहेतोः कदाकालेपिवेय
मित्यर्थः ॥ ९ ॥ पदन्यासक्रीडा ॥ ९१ ॥ तेतवचरणयुगलंरचे आकाशेअलमत्यर्थंसिंच
रंतः नवनकलहंसानत्यजे तिकीदृशाः पदन्यासक्रीडा परिचयं चरणविन्यासलीला
भ्यासंसमासमं तात्लघुधुंमनां सियेषांते आलधुमनस्वइव चरणयुगलं कीदृशं सुभग
स्यमनोहरस्यमत्तिमंजीरस्यरत्ननूपुरस्यधरणितेतच्छलात्कपतात्स्वस्यचरणस्य
विक्षेपेविन्यासेत्रिय्वामाचहाणाँ रुवाणां पुनः कीदृशंचारुचरितेमनोज्ञसंचारं ॥ इति
दौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौ॰ टी॰ तुचरित्रैस्त्वामाश्लोकेसंचारकर्मणीतिविग्रहः चारुचरितेइतिसंबोधनं वा॥ विद्युपक्षे॥ स्व
५९ विक्षेपकालेचारुचरितेउल्लासमनोरूपचरितेशिक्षामाचक्षाणमिस्त्वयः॥ शेषंतुल्य
म्॥ परत्वात्सेव्यस्यविवृत्तिः वल्कलतरुनवनेश्रीचक्रेहेपेरजायांतेक. लोमत्तोमधुरः
कंठोयेषांतेकलहंसाः चक्रादिदेवताः तेचरणकमलमस्माननहेकंकमलसंकोचविं
कासः — प्रपंचाद्वैतात्मकब्रह्मस्वरूपमद्वैतपदहंद्वमिति॥ कलामृतवचनात्॥ नजहाति 98
नस्यजंतिपदानिस्थानानिचतुर्दशभुवनानितेषांन्यासः रक्षित्रीजारस्तापरिचयः सं
हारस्तारध्येंकर्तुंमनोयेषांते॥ तथासख्यादिकारणसामर्थ्यासमर्थांत्वंचरणेपासनां ५९
कुर्वंतीत्यर्थः॥ खेहृताकाशेलचरणंचरंतः श्वासादयंतः ध्यायंतइत्यर्थः॥ श्लोमन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ख्यासौ अनिर्देश्यश्चेति अनिर्देश्यः निर्विकल्पस्वरूपं ब्रह्मज्ञानं तस्मिं शिक्षामाचक्षणा।
कीदृशं चारुचरिते मोक्षदानस्वभावेन चरित्रयुक्ते स्वच्छम् अनगमैश्वर्यमस्यास्तीति स्वन
गः ईश्वरः ॥ मंजु करोति मंजीरं। जीवेश्वरयोस्तयोरणितं व्याख्यातं जडहृदं जंघे क्षण ६६
यापि निर्विकल्पस्वरूपं ब्रह्मज्ञानं माचक्षणा हेतो हेतुरूपं त्वच्चरणारूपद्वयं सख्यादिकार
णसामर्थ्यलाभार्थं त्वं स्तानस्फुरं तिष्ठमयपद्देपि इत्यर्थः ॥ भवानीपद्दे ॥ भवनक
स्हंसाः श्रीचक्रस्थाः देवताः पंचाशत्संख्यकाः तथाहि ॥ प्रथमं गुरुस्वचक्रेश्वरः ततो
गणपतिः सर्वद्वारनिविष्टः ततो नानारूपमहोद्यानेकालनाथः चतुर्द्वारपाल
को कल्पतरुवाटिकायां वसंतनाथः ॥ संतानतरुवाटिकायां ग्रीष्मनाथः ॥ पुष्परागवा

CC-0. In Public Domain. Digitization by eGangotri

सौ·र्य· टिकायांमृत्युंजयनाथः॥पद्मवाटिकायांदेवमातागायत्रीमुक्तामणिवाटिकायांस्वर्णा
६० गेदेवेंद्रनाथः॥तस्यादक्षिणेवैश्वानरः॥तस्यायाम्याशायांयमनाथः॥तस्यादक्षि
ऋ णेपश्चीमेनिर्ऋतिनाथः तस्याःपश्चिमेवरुणनाथः॥तस्यावायव्येमारुतनाथः॥तस्यै
उत्तरेकुवेरनाथः॥तस्याःशागुत्तरलागेरुद्रः॥विद्रुमरुद्रवाटिकायांब्रह्मनाथः॥मा
श्री णिक्यमंडपेश्रीविष्णुनाथःसहस्तंभमंडपेभानुनाथः॥अमृतवाटिकायांभारदेवी॥ ९९
विमर्षणवाटिकायांउल्काख्यादेवी॥मंडपवाटिकायांमार्तंडभैरवः॥चंद्रिकोद्गार
छायायांसोमनाथः॥शृंगारपरिखास्वायांचंद्रनाथः॥महापद्माटव्यामन्नपूर्णा॥चिं ६०
तामणिगृहशाग्द्वारेदुर्गानिहारिका चिंतामणिगृहासंतरेकुमारकामेश्वरः॥पंचब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समहापंचाधररा धस्तं ह्रीबालांबिका। चिंतामणिगृहराजपरितोषांनुनाथः। चिंताम
णिगृहपूर्वद्वारे समृतेश्वरी उच्छिष्टिका। चिंतामणिगृहराजपूर्वोत्तरमणिधिस्थे॥ मं
त्रचक्रमातंगी॥ तस्यैव दक्षिणनगोमणिधिस्थे मंत्रचक्रवाराही॥ चक्रराजमहारथग
हेमहानन्नानद्वारिकेति श्रीचक्रस्थानेश्रीकामेश्वरी महाद्वारिकेति॥ ६१॥ स्मरालाकेशो।
षु॥ ६२॥ केशेषु स्मरालाचक्रामें दह स्मितेईषद्धसिते भ्रूलतास्वनावेनस्मरलाक्षज्वीगा
त्रेशरीरे। शिरीषकुसुमकोमलांग्रचतते स्तनाभोगेदृषदिवस्थिरे चकठोराकठिनाम
ध्येउदरे न श्यामतिशयेनतन्वीलग्नावरस्यश्रेष्ठस्य आरोहस्य नितंबस्य विपर्ययेस्था।
नेरप्युः प्रथिमगुणयुक्ता आरोहंजघनं श्रोणीनितंबः स्त्रीकटीतटेइति विश्वः॥ ए

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेशांगोमहे ग्रास्य करुणा भवानीरूपा अरुणा रक्तवर्णा काचिदनिर्वचनीया जगत्त्रय
तंत्रातुं रक्षितुं जयतीसर्थः ॥ विष्णुपदे ॥ शंकरस्यार्णमत्र तस्मादिति शंभुः विष्णुः ला
स्यकरुणा जयतीति कीदृशी केशेषु कः ब्रह्मा ईशः शिवः तद्विरुद्धेषु स्वराः तावत्काम्य
मेरमस्वत्वं रसितमुपहासोयः सः समंदहसितो नारदः तस्मिन्प्रकृतिसरलास्वभा
वतः ऋजुः ॥ श्रीविष्णुं गायंतीत्यगाः वैष्णवास्तान् आसमंतात् त्रायते रक्षतीत्यगात्रो वै 100
ष्णवरक्षकः ॥ यज्ञानगच्छतीत्यगः ननस्पतिर्वरतः आसमंतात् त्रायते रक्षतीत्यगा
त्रो वैष्णवरक्षकः ॥ यज्ञानगच्छतीति अगः ब्राह्मणः तस्मिं शिरीषवत्कोमला कामि ६२
ना ऊरुचयोस्तटे निकटे यस्याः सो ऊरुचनरः कामी तस्मिन् दृषदिव कठोरा वरं तपस्विन

मारोहंतीति वरारोहा हे स्त्रा: तेषु नरांतनीस्वन्नाड्य: मध्ये लहयाउपरि पृथुबहुला
अरुणकाचिदिति श्रुतिउत्सितज्ञाने अरुणा अनुकूले सर्थ:॥९४॥ पुरारातेरंत:
९५॥ पुराराते: शिवस्य त्वमंत:पुरं प्रधानमहिषी असि नवसित तो हेतोस्तरलकर
णानामजितेंद्रियाणां तव चरणयो: सपर्यामर्यादासु संपूर्णसपर्या चपूजा च मर्यादि
तिष्ठा इति वा असुलभा दुष्प्राप्याउ: साध्येति यावत्॥ तथापि संपूर्णपूजाया अभा
वेपि असंपूर्णपूजयैव एते: तरालकरणानां रंभादिपरीरंभादिसंभावितानां तथापि
संहतहतय: शतमखमुखा: इंद्रादय: अमरा देवास्तव द्वारोपांते स्थितिभिस्त्व
दीयचिंतामणिगृहराजस्यांतिकमहत्कानि विष्टानिरणिमादिभिर्दशभि सिद्धिभिर्नी

CC-0. In Public Domain. Digitization by eGangotri

सौ· यं· ऽैश्वर्यसंपदमतुलामतिशयितांनीताः प्रापिताः इत्यहो त्वन्माहात्म्यप्रकर्षेत्यर्थः।
६२ ।विष्णुपदे॥ हे अंतःपुरस्य अंतःपुरे अंतःपुररूपामालक्ष्मी यस्य सतथा ततः इत्यत्र पथ
ममायां तस्मिन्नतेन सितासितासात्विकीत्वच्चरणयोः सपर्यामिर्यादा तरलकरणानां
इंद्रियादीनां पुरनामकदेहस्य नेरकर्तुः शिवस्यास्तुलनाय ह्या॥ पुराणामरातेर्नाशक
स्यतवद्वारोपस्थितिर्निरिति अन्वयः॥ अथवा तवचरणयोः सितासितासत्वप्रधा
नासपर्यामर्यादा तरलकरणानां मोक्षककःस्यसजानामि अदीनामरातेः प्रल्हादः 101
स्य पुरास्य सुखमाघातोऽस्मिजाता॥ तथापि ज्ञातमस्य मुखाअमराः अणिमाद्यादि ६२
भिः सिद्धिं नीताः संपूर्णफलावाप्तेः यद्यपि प्रल्हादस्य तथापीशादीनामसात्विकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजसेनैवगुणेन अणिमादिसिद्धिर्जातेत्यर्थः ॥६४॥ गतास्तेमंचत्वं ॥६४॥ ब्रह्मासृ
ष्टिकर्ता विष्णुः स्थितिकर्ता रुद्रः संहर्ता ईश्वरस्तिरोधानः एते चतुर्भिः पदार्थरूपेण
स्थितो धारितः शिवः सदाशिवः अनुग्राहकः ते तत्त्वपंचत्वंगतः कीदृशाः स्वच्छछायया ए धा
कां तच्छायया कोसौ घटिता तद्रूपेन उज्वलेन प्रच्छदपटः आस्तरणपटरूपः सदाशिवरू
पत्वात् एतादृशाः ऊरवकतरोः स्वच्छेदेन दृष्टातिकरवत्वदीयानां त्वदंगसंगमेतानो शिवस्य
नासामारक्तकान्तीनां प्रतिफलनजातेन संक्रांतिजातेनारुणतया शरीरीलतबीजप
रिग्रहः ॥ शृंगाररसइवेत्यर्थः ॥ तदुक्तं रुद्रयामले ॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च स
दाशिवः ॥ एते पंच महाप्रेता नृतादियतयो मताः ॥ चत्वारो मंचचरणाः पंचमः प्रच्छदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौ॰टी॰प॰२॥ सचेतस्य काकारूपेण शिवेनाभिन्नविग्रहः तत्रास्ते समासीना निर्जराणां स्वरूपि
६३ णीति॥ श्रृंगाररसस्य प्राधान्यं संगीतशास्त्रे॥ श्रृंगारः शुचिरुज्वलइति शुक्लत्वं वैः
शेषधर्मप्रयुक्तं॥ तथाप्यनुरागप्रधानरजोगुणमयत्वात् रक्तवर्णनमिति सर्वगंतव्यं विशु
पदे॥ शिवो गुणत्रयरहितः शुद्ध आत्मा तवमंच त्वं नीजस्थलत्वं गतः आत्माराम
त्वात्स्वतः सः आत्मा कीदृक् द्रुहिणहरिरुद्रेश्वरध्यतः हरिरिंद्रः एभिर्दैवैः हृदय 102
ध्यानावस्थायां ध्यतः स्वच्छच्छायया वासनारहितच्छायया बुद्ध्याघटितो संबद्धः
कपटो मायातद्रूपः साकारकत्वात् तच्छुद्रपटोपस्यस तथा शुद्धस्य मायारहितत्वात् ६३
त्वदीयानामीश्वरसंबंधिनीनां नासौ बुद्धीनां मायारूपाणां प्रतिफलनलाभोदरुणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः जगत्कर्तृत्वाभिमानवान् अत एव मुक्तश्चैतन्यस्य मायासंपर्कात् स एव हि ते शरीरि
शृंगाररस इति अरूपोऽहं मां कौतुकं दोग्धि रूपवानिव नवतीत्यर्थः ॥ अथवा शिवो
महेश्वरस्त्वमं च त्वं गतः ध्यानेन त्वां हृदये स्थाने चतामापन्नः शिवः कीदृशः द्रु
हिणहरिरुद्रेश्वरान्ततः एतैरपि रव्यातः पुनः कीदृशः स्वच्छेति स्वतकांतिसंबद्धप्रबद्द
पठरूपः ॥ अत एव मं चत्वेनोक्ताः त्वदीयानां नासां श्यामकांतीनां प्रतिफलनलाने नैर्म
रुणतया स्वर्यतया प्रकाशाकयेति यावत् शरीरिशृंगारो रस इवेति शृंगाररसस्य श्याम
मूर्तित्वादिति भावः ॥ ६४ ॥ तवानीतः पञ्चम्यां ॥ ६४ ॥ स्वयं श्लोकः हेपकः ॥ ६५ ॥ कलंकः
कस्तूरी ॥ ६६ ॥ कलंकः लांछने कस्तूरी रजनिकरबिंबे चंद्रमंडलं जलमयं जलस्वरूपं अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौ·टी· तएवमकृतकरंडं अतिगम्भीरस्य जलस्यान्तरी हरितोपलछिद्रैः कलाभिः षोडशसंख्याभि
६४ रेव कर्पूरैः घनसारपिंडैः निबिडं भरितं॥ एक्यपक्षे॥ लयंयोगेन तां दृष्ट्वा स्वात्मस्वरूपेण
रिक्तऊहरं स्वस्यात्मांतरनिरतं विधिवेक्ष्याता लकरंडं वाहकौतूहलात्वयोगेन सेव्य
मानान्॥ स्थयोस्तयः प्रतिष्ठकापहं कलांतरं कईरखंडानादायत्र हतेत्वदर्शनिविड
यति पूरयती सुनयपक्षस्य धारणार्थः॥ वस्तुतस्तु कलंकः चंद्रकः चिन्हं बिंदुचक्रस
पंकलंको कापवादयोस्तदेवकस्तूरीवासनाधैर्दवचक्रवासनया वासितस्य चक्रोंत
रस्य सर्वसिद्धिप्रदस्य तद्वृत्तं योगिनी हृदये॥ एत्याकारादिति पुनः कीदृशं जलमयं। ६४
रजनिकर बिंबममृतमयं चंद्रमंडलरूपं॥ मध्यत्रिकोणमुदितं परमामृतार्द्रमिन्दुके॥ 103

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मृतबीजवकारात्मकमित्यर्थः ॥ रिक्तकुहरं रिक्तः शून्यो विसर्गः कुहरे रंध्रमध्ये यस्य
तत् अतः अकारमारभ्य कलानिर्विहितस्वरैः तदधिष्ठातृकामेश्वर्यादितत्तत्तिथि-
रूपपंचदशविद्याभिः कर्बुरैः चक्रांतरवारकैः निविडितं वेष्टितं मरकतकरंडमिति।
बिंदुचक्ररूपकमिदं बिंदुचक्रं त्वन्देहेन त्वच्छरीररूपेण एकैकनित्यात्मना प्रतिदिनं प्र-
तितिथौ विधिर्वीक्षं नयोन्नयोनि विडयति योजयत्सर्वेना वः पंचपंचस्वरस्फुटं त्रिको-
णरेखात्रयं प्रसह कामेश्वर्यादिचित्रांतानां नित्यानां मध्ये विसर्गसुंदर्यास्तु सृजनं पु-
नर्मध्ये सनुलोमविलोमक्रमेणास्मुल्लेखस्य परिहितयोः कामेश्वर्यादिचित्रांतानां चित्रादि-
कामेश्वर्यंतानां तत्तत्तिथौ एकैकस्याः एव सृजना धुत्तमत्रेति॥ शून्याकाराद्विसर्गान्ता-

सौ॰ टी॰ द्धितु अस्यं दसं विरः॥ ३ काश्यपरमार्थत्वात्स्फुरत्ता लहरीयुतं॥ यस्तं विम्बलहरीस्वात
६५ मारचयात्मकम्भेदं वं चक्रमेतस्य त्रिरूपं च पुनर्भवेत॥ धर्मी धर्मौ तथात्मानौ मात
मेयौ तथा प्रमा॥ नवयोन्यात्मकं चक्रं चिदाकारं महदिति॥ हे नित्ये तव स्वदेहोन्हता
न्निस्त्रशरीरे स्या न्नि घृणिभिः किरणरूपाभिरणिमाद्याभिरावरणदेवताभिरभितो निषे
व्यसे यमानां त्वमहमिति अनेन येना भावयति त्रिनयनस्य शिवस्य समृद्धिमैश्वर्यंत
णायतः तृणवत्समाणस्य तस्य महासंवर्त्ताग्निः प्रलयाग्निः नीराजनविधिं रचयती
ति किमाश्चर्यं नाश्चर्यमित्यर्थः॥ तदुक्तं॥ त्वद्देहोत्थिततेजोभिः किरणैरणिमादिभिः॥ ६५
आर्वतां त्वमहमिति भावयेस्त्वत्समो न वेदिति॥ ९ द्या स्वदेहोन्हतानि घृणिभिरणिमा

घामिरभितोनिषेव्यां निस्ये त्वामहमितिसदा नावयतियः। किमाश्चर्यं तस्य त्रिनयन
समृद्धिंतृणयतो महासंवर्ताग्निर्विरचयति नीराजनविधिम्॥९७॥ हे नित्ये तवस्व
देहोन्नताभिः त्वच्छरीरोत्थाभिः घृणिभिः किरणरूपाभिरणिमाद्याभिरावरणान्तर्ताभि
रभितो निषेव्यां सेव्यमानां त्वामहमिति अभेदेन यो नावयति त्रिनयनस्य शिवस्यस
मृद्धिमैश्वर्यं तृणयतस्तृणवत्पमाणस्य तस्य महासंवर्ताग्निः प्रलयाग्निः नीराजन
विधिं रचयतीति। किमाश्चर्यम्॥ नाश्चर्यमित्यर्थः॥ तदुक्तं कादिमते॥ त्वद्देहोत्थित
तेजोभिः किरणैरणिमादिभिः आवृतां त्वामाहमिति नावयंस्त्वत्समो भवेदिति॥९७॥
समुन्नतस्थल॥ ९८॥ हे उमे विमलाः पुरुषा नवसंतानकाः अमीषाममुरो वक्षस्थलंस

CC-0. In Public Domain. Digitization by eGangotri

सौ·टी·

९९

ति

मुन्नतस्थूलस्तनभरः समुन्नताः उत्तुंगतयोन्नताः स्थूलपरिणाहवान्स्तनभरो य
त्वहसितं स्मितं चारु मनोहरं कटाक्षे अपांगप्रदेशे वक्रितचलनकृतिपर्य्ये कंदर्पः कामः व
पुः शरीरं कदंबद्युतिवत् कदंबवत् रोमांचयुक्तमित्यर्थः॥ इयं परिणमतिः परिणामः।
स्वच्छतास्वरूपानवंती त्यर्थः॥ अतो हरस्य चित्ते त्वं भ्रांतिं त्वद्भ्रमं जनयति हरोपि त्व
न्मयतां स्वदाकारान् दृष्ट्वा विषमशरविह्वलांगो भवतीति भावः॥ भवति त्व 105
यि भ्रांस्मरणे भवति कीदृशे उमे उत्क्षामा श्यामा तत्त्वज्ञानरूपा यस्मात्॥ उन्नतमध्यमा
जननत तस्यापि शिवस्य मनसि भ्रमजनकत्वेन विरोधालंकारः समीपांतस्तनांहरो ९९
वक्षस्थले स्थूलः स्तनभरो यस्याः सौकौसुंभ समुन्नतं वा नस्थूलस्तनभरं यस्याः समुन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः स्तुत्यः स्तनशाखात्यतिरूपः यः श्रीवत्सांकस्तं बिभर्ति शेषं समानम्॥ ९८॥
कलत्रं वैधात्रे॥ ९९॥ हे सति न केवलं त्वां नाम्नासती अपि तु सतीनाम वरमेपि
त व्रतानां प्रधानभूते वैधात्रे विधातृसंबंधि कलत्रं सरस्वती कति कवयो न भजंते
कलत्रीकुर्वंति॥ यस्मिं किंचित्कवित्वेनैव कलत्रं कुर्वंति सरस्वतीवध्वम्तु त्वं प्राप्नुवंति
लक्ष्मीदेव्याः पतिः कैरपि किंचिन्मात्रैरपि धृतेः को वा न नवति तव योपधराम्यामा
संगः परिष्वंगः तत्र वक्रतरो रम्यसुलभः उपपचने आलिंगनेन रहे विशेषस्पृष्टुर्ल
न इ स्पर्धः॥ विस्तुपहे॥ आलिंगनाद्विना महादेवं श्रेष्ठदेवं हि निश्चितं त्वां लक्ष्मी ल।
त्यसतीनां च सतो देहसतीनां विद्यमानानां अचरमा श्रेष्ठा ई लक्ष्मीस्तस्याः कुचा

CC-0. In Public Domain. Digitization by eGangotri

सौ॰टी॰ नामासंगः उरवक्रतरोरम्यसुस्तनः ॥ अथ वा वैधात्रं कलत्रं सरस्वतीकृतिकर्त्तयो
६१ ननजं ते तस्याः कोवेसावापतिर्नभवति अपि तु नव स्सेवत तथाश्रियो लक्ष्म्याः वैर
पि धनैः कौस्तुभादिभिः सहइत्यास्यामासंगः महादेवं हि लातथेवनाम्रस्यकीह
राः उरवक्रतरोरप्यसुस्तनः ननु लक्ष्म्यास्त्वदितिरिक्तेन गमते किम् ॥ सत स्याह रे।
ध्याः दिवइति धात्वनुसारात् कांतिशीलायाः श्रीजावस्याः गतिशालिन्याः चरमेवय 106
सि वार्द्धके सति सती नामती तसंस्थानं वेति ॥ तथा च लक्ष्म्या अपि धैर्यत्वय्येवेति ल
स्यभावो लक्ष्यं ईदृक्स्यर्थः ॥ ९९ ॥ गिरामाहुर्देवी ॥ १०० ॥ हे परब्रह्ममहिषि महेशपत्नि म ६१
हामाये अनाद्यविद्यारूपे ब्रह्मणः पत्नीं गिरां देवीं सरस्वतीं त्वामाहुः ॥ वेदविदः ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रे विष्णोः पत्नी लक्ष्मी हरस्य शिवस्य धर्मिणी हिमालयपुत्री माकुः ॥ स्वमतमाह ॥
त्वं काप्यनिर्वचनीयचातुरीया सरस्वत्यादित्रितयातिरिक्ता दुर्गमा दुर्जेया निःसीमा
महिमा प्रभावो यस्याः सा विश्वं जगत् जातं त्वन्मयमसि स्वकीय नानारूपप्रदर्शना
दि बुद्धिमंतेकरोपील्पधीः ॥ विष्णुपक्षे ॥ हे महामाये महामाया लक्ष्मीः यस्येत्य
र्थः ॥ त्वां सरस्वतीं लक्ष्मीं लक्ष्मीं भवानीं चागमविदो वदंति स्त्रीरूपोपि त्वमेवे
त्यर्थः ॥ वस्तुगत्या कापि दुरधिगमा निःसीममहिमा तुरीया जाग्रत्स्वप्नसुषुप्त्य
वस्थाऽतिरिक्तावस्था त्वं विश्वं जगत् त्वन्मयमसि नानात्वं दर्शयसि कीदृशं जगत्
परं ब्रह्मैव महिमा वाहनमाधारः उपाधानकारणं यस्य तत् परब्रह्ममहिषिम

CC-0. In Public Domain. Digitization by eGangotri

सौ·टी· हिषवाहनत्वेनसंसाररूपवर्णितातस्यमस हश्रान्तयदायकत्वेनरूच्यते।१०

६८ सरस्वत्सालह्रया॥२·१॥त्वेस्र्जनवान्त्वेस्तो·सरस्वसागाधपद्यानिरूपया

चिद्घयालक्ष्म्याघनसम्स्नेहेनविहरतेक्रीडतेविधेः ब्रह्मणः हरेर्विष्णोः सपत्नः

समानपत्नीकः रम्येनमोम्नेनेनवपुषाशरीरेणरतेः कामपत्न्याः पातिअलंशिथि

लयतिहरीकरोतिचिरंजीवनेवब्रह्माघनुत्वंयोनीयंकालमुत्वंकवर्तमानइवहृषि 107

तोहरीक्षतःपशुपाशानांपुत्रकलत्रादीनांप्रतिकरःसंबंधोयेनसः।तथाचयद्दा॥

हृपिताःपश्यन्तांपाशापहरणाशंकादयःतेषांप्रतिकरोयेनतथाभूतःसन्परब्रह्म ६८

नामकंरसं॥रसोवैरसःइतिश्रुतिः॥रसयन्सास्वादयन्तीसर्थः॥तदुक्तंकुलरू

उमगणौ ॥ घृणाशंकाभयं लज्जाजुगुप्साचैवपंचमी ॥ कुलंजातिस्तथाशीलंचैवाष्टौ
पाशाः प्रकीर्तिताः । एतैः पाशैर्विरहितो निर्विकल्पोजितेंद्रियः । विमुच्य आसमहां
शानः क्रमेणपुरुषः स्मृतः । विस्नुपहे ॥ हरिरिंद्रः शोभसमानम् ॥ २०१ ॥ निधे निस
मेरे ॥ २०२ ॥ निधीयतेजगदस्मामितिनिधिः जगदाधारस्तेनसंबुद्धिः । निस्मेरे नि
स्मितो जसहृदनेजीवानां मिथ्याभूतजगद्दावेशनिरीक्षणं स्मितकरणं तनु ॥ ज
गदाधारता शरीरस्य स्मितयोगश्च शरीरिणां परस्परविरुद्धं कथमेकत्रह्यावैवेसं ल
स्याह । निषिद्धगुणेन स्वानुग्रहग्रहणायनानारूपगुणविकारेणसर्वमुपपद्यते
तवैवेतिभावः ॥ ननु पदिनि स्वानुग्रहाय शरीरादिपरिग्रहः तत्कथं चिरजा ॥ कीदृ

त्तपस्वीसाच्विकत्वेपुतारतम्यमित्यत आह॥नीतिनिपुणेभ्य इत्यनुरूपफलदानस्वहेत
र्हि कर्मपरतंत्रत्वमाह॥इतिनिरवद्यत्वाद्यलिहतं निराघातत्वान्नेतिनिराघातमप्रति
लरतं अन्यानधीनत्वान्नमनुग्रहापयस्याः॥ननुस्वातंत्र्येपि कश्चिदिहफलदात्वंतवे
ति॥कथं वैषम्यमत आह।नियमपरचित्तैकनिलये ध्यानयुक्तानां नियमपरचित्ता 108
मात्रस्थिते॥तर्हि नियमपारतंत्र्यमेवागतमत आह।निसानिर्मुक्ते नियमादिजन्य
दृष्टानपेक्षे॥एतादृशां मयि किं प्रमाणमत आह।निखिलनिगमांताः सकलवेदां
ताः एवस्तुतिपदानि यस्यास्सा सर्वत्र वेदांतत्वमेव प्रतिपद्येतिभावः।स्तुतपदे इ ६९
तपाठे वेदांतैः स्तुतं पदं चरणो यस्या इत्यर्थः॥केनप्रकारेण स्तुतपदे इत्यत आह।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरातंके। निर्गत आतंको बंधुजननी लियस्याः सा निःशेषकालत्रयार्यै ध्येममापिइ
मांस्तुतिं निगमयति निगमी उरुतल्करोती सुक्तेणिइ॥ वेदमिवसर्वस्व प्रतिपन्नं कुर्वि
स्यर्थः विघ्नुपक्षे॥ हे निधेन ज्ञानानि धिस्वरूप अन्यानि पदानि सम्पन्नतानि तेन नि।
सहादिगुणयुक्ते विषयेइ मांस्तुतिं मम निगमय वेदादरणीयां कुर्विस्यर्थः। मम
स्तुतिं चानेन यामंस्व कर्तृत्वम पाकरोति॥१०२॥ प्रदीपज्वालाभिः॥१०३॥ हे वाचां ज
ननिमातकारूपे त्वदीयालिरेव वाग्भिस्तव स्तुतिरियं नमद्वाग्भिरित्यर्थः॥ यथा प्र
दीपज्वालाभिः दिवसकरस्य सूर्यस्य नीराजनविधिः आरात्रिकाविधानं न हि सक
लनुवनांतवर्ति ध्वांसक स्यन गावतो मार्तण्डस्य प्रदीपज्वालाभिः प्रकाशाइ स्यर्थः॥

तद्ध्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सौ॰टी॰ सुधास्रुतेः चंद्रस्य चंद्रकांतमणिसंनिवपाणीयैः पाद्यघटना अर्घ्यदानम्॥ स्वकी
७० यैर्निजैर्जलैरंभोनिधिः समुद्रस्य सौहित्यकरणं तृप्तिसंपादनं॥ सौहित्यं तर्पणं तृप्ति
रित्यमरः॥ अथयत्रशब्दानां वैशद्यदीपत्वादीनां दृष्टांतता निदर्शनालंकारनीमा
ति तीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरमिति वत्॥ विष्णुपदे॥ जननमस्यास्तीति
जननी जीवः जननिनां वाग्वचनं तासां जननिवाचांमध्ये॥ इयं त्वदीयाभिरेव वा 103
ग्भिरं तर्यामितया त्वयैव निर्मिता मन्मुखान्निःसरणमात्रमेतस्याः॥१०३॥ सर्वं
मदीयमवलोक्यतत्तोपि सम्यगर्थांतरं समधिगम्यन निद्यमेतत्॥ सुसंतदुर्गम ७०
तरेपथि संचरंतः स्वाध्यानवंतिकवयः पुरतः श्रयातां॥ बोधेन ते जननिजातुज

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सौं·टी· नार्दैनेन वैकुंठनाथपरितापितेन तातेन ॥ मातर्न वा निकरवाणि तथापि कान्तु
७१ माकुंठितो स्तमयिते करुणः कृतार्थः ॥ ॥ इति श्रीश्रीजगन्नाथःस्कृतो सौंदर्य
लहरीटीकासंपूर्णम् ॥ ॥ ॐनमोनवात्मे ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ ॥
यादृशंपुस्तकंदृष्टा तादृशं लिखितंमया ॥ यदि शुद्धंमशुद्धंवा ममदोषो न दीयते
॥१॥ लौ· शुकलशुरवरामेण यये पुस्तकं स्वामी अनन्तदेन पठनार्थं इदं पुस्तकं।
संवत् १८ ३६ प्रवर्त्तमाने उत्तरायणगते रवौ माघमासे कृष्णपक्षे तृतीयायां वा
रभौमेण लेखयेत् ॥ शुभंभवतु ॥ ॥ ॥ ॥ ॥ श्रीरस्तु शस्तु ७१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१००८

॰सौंदर्यलहरीटीका॰

110

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं० ४२२४

षष्ठी पूजा विधिः

व्यासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष.पू. १

श्रीगणेशायनमः ॥ ॥अथषष्ठिकापूजाविधिः ॥ भविष्योत्तरे ॥ युधिष्ठि
रउवाच ॥ पुत्रेजातेऽथकन्यायामुत्सवंकिंविधीयते ॥ किंदानंकस्यपू
जावाकिंपुराणंकोविधिःस्मृतः ॥ श्रीकृष्णउवाच ॥ पुत्रेजातेव्यतीपातेग्र
हणेचंद्रसूर्ययोः ॥ पितृःसंवत्सरेदिनेदानंकोटिगुणंभवेत् ॥ श्रृणुपां
डवयत्नेनकुतोत्सत्तोमहोत्सवम् ॥ जन्मषष्ठदिनेकार्याषष्ठीनाम्नीत्रि
शूलिनी ॥ पराह्णसमयेभित्त्यांगोमयींमूर्तिमालिखेत् ॥ कपर्दिका

गमः १

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदानव्याचांगेचांगेविशेषतः॥ कर्णयोःकुंडलंदद्यादूर्वापल्लवशोभिता
म्॥ दिव्यवस्त्रपरीधानादिव्याभरणभूषिता॥ अग्रेदीपाष्टकंदद्यान्नै
वेद्यंविविधैःफलैः॥ नारिकेलादिकंतद्देशकालोद्भवंफलम्॥ तत्फलं
कलशंतस्याअग्रतःस्थापयेद्बुधः॥ द्विजन्मानंसपत्नीकंसदाचारसम
न्वितम्॥ आहूयकारयेत्तस्यास्तयोर्हस्तेनपूजनम्॥ यद्वा॥ भक्तःतंडु
लनैवेद्यंवाषष्ठीपूज्यानाराधिप॥ षष्ठीपूजामंत्रस्तु॥ ॐ अम्बेअम्बिके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष॰पू॰
२

इति॥सूतकप्रथमेऽह्नि षष्ठे च नो सूतकमाह॥प्रथमे दिवसे षष्ठे दश
मे चैव सर्वदा॥त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति व्यासोक्तेः॥प्र
थमदिने जातकार्ये दानादौ च षष्ठदिने षष्ठीपूजायाम्॥दशमदिने बं
धनसंबंधनादौ च सूतकाऽभावो दर्शितः॥पुत्रग्रहणं चात्र स्त्यपत्यवाचकं
पुत्रे जातेऽथ कन्यायामिति प्रागुक्तत्वात्॥ ॥अथ प्रयोगः॥ ॥
कर्त्ता कृतनित्यक्रियः शुक्लांबरधरो देशाचारात्प्रदोषसमये पूजास्थान

राम॰
२

1.12

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मागत्य॰ हस्तौपादौप्रक्षाल्य॰ आसनेपूर्वाभिमुखउपविश्य॰ पिताऽऽचार्योवा
दीपंप्रज्वाल्य॰ आचम्य॰ सामान्यार्घस्थापनंविधाय॥ ॐ अपसर्पन्तुयेभूता
येभूताभुविसंस्थिताः॥ येभूताविघ्नकर्त्तारस्तेनश्यन्तुशिवाज्ञया॥ इतिमंत्रे
णासर्षपान्विकिरेत्॥ ततोब्राह्मणवरणम्॥ कुशादीन्यादायसंकल्पंकुर्या
त्॥ ॐ अद्येहेत्यादिदेशकालौसंकीर्त्यअमुकगोत्रस्याऽमुकशर्मणोममाऽभि
नवजातबालकस्यायुरारोग्यपुष्टिपूर्वकमुत्तरोत्तरतोहर्षविजयप्राप्त्यर्थं
षष्ठीमहोत्सवकर्मणिनानानामगोत्रानानानामशर्मणोब्राह्मणानेभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनपूगीफलपुष्पाऽक्षतवासोभिर्युष्मानहं वृणे ॥ ततः पुण्याहवाचनम् ॥
ॐ अद्येह अमुकगोत्रस्य मम गृहेऽभिनवपुत्रजन्मांगभूतषष्ठिकादेवीपूजा
कर्मणि भो ब्राह्मणाः पुण्याहं भवंतो ब्रुवंतु ॥ इति त्रिः ॥ आद्यः ब्राह्मणाश्च पुण्या
हं इति त्रिवारं ब्रूयुः ॥ पुनस्तु मा ॥ पूर्ववत्स्वस्ति भवंतो ब्रुवंतु ॥ ॐ स्वस्ति ॥ स्व
स्ति न इन्द्रः ॥ तद्वदृद्धिर्भवंतो ब्रुवंतु ॥ ॐ ऋध्यताम् ३ ॥ ऋध्यास्म ॥ पुनस्त
द्वत् शान्तिर्भवंतो ब्रुवन्तु ॥ ॐ शान्तिः ३ ॥ द्यौः शान्तिः ॥ तद्वत्कार्यकल्याणं
भवंतो ब्रुवंतु ॥ ॐ कल्याणम् ३ ॥ यथेमाम ॥ इति पुण्याहवाचनं कृत्वा तदनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरम्॥ प्रथमतो दूर्वांकुरसर्षपराजिकाभिः पीतवस्त्रे पोटलिकां कृत्वा सूतिकोप
रिरक्षार्थं लंवयेत्॥ नां सर्वकर्मांतेकांडेनभिंद्यादितिसमाचारः॥ ततो वहिर्वलि
दानम्॥ ॐ क्षेत्रपालनमस्तुभ्यं सर्वशांतिफलप्रद॥ वालस्यविघ्ननाशार्थमिमं
गृह्णवलिंमम॥ दैत्यभूतपिशाचाद्या गंधर्वाराक्षसांगणाः॥ शुभंकुर्वंतु ते सर्वे
ममगृह्णंत्विमंवलिम्॥ ततः सूतिकाद्वारदेहली मध्ये गणपतिं संपूज्य॥ ॐ स
र्वविघ्नहरोसि त्वमेकदंत गजानन॥ षष्ठीगेहेर्चितप्रीत्याशिशुंदीर्घायुषंकुरु
लंवोदर महाभाग सर्वोपद्रवनाशन॥ त्वत्प्रसादादविघ्नेन चिरंजीवतुवालकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारदक्षिणे ॥ ॐ क्षेत्रपालाय नमः ॥ द्वारवामे ॥ ॐ दुर्गायै नमः ॥ ततः कर्त्ता प्राङ्मु
ख उदङ्मुखो वा स्वासने उपविश्य ॥ चम्पःकुशादिकमादाय ॥ ॐ अद्येत्यादि
देशकालौ संकीर्त्य अमुकगोत्रस्यामुकशर्मणो मम अभिनवजातबालक
स्यायुरारोग्यपुष्टिपूर्वकउत्तरोत्तर हर्षविजयप्राप्त्यर्थमेतत्षष्ठी महोत्सवक
र्मणि दीपकलशगणेशपूजनपूर्वक षष्ठिकास्कंदगौर्यादिषोडशमातृका
षट्कृत्तिकादीनां यथालाभोपचारैः पूजनमहं करिष्ये ॥ नमोस्त्वनंतायेति
दीपं संपूज्य ॥ गणानान्त्वेति गणपतिं संपूज्य ॥ ॐ महीद्यौरित्यादि मंत्रैः कल

114

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शस्थापनविधिना कलशं संस्थाप्य-भूरसीत्यादिभिश्च ॥ सर्वे समुद्रा इति मंत्रे
ण कलशे तीर्थान्यावाह्य ॥ ॐ तत्वायामीति वरुणमावाह्य पूजयित्वा ॥ ॐ क
लशस्य मुखे विष्णुरित्यभिमंत्रणां कुर्यात् ॥ ततः कलशास्कंधप्रदेशे ॥ गणप
त्यादिपांचायतनाः ॥ विनायकादिपंचलोकपालाः ॥ सूर्यादिनवग्रहाः ॥ ईश्वरादि
अधिदेवताः ॥ इंद्रादिदिक्पालादिवनस्पत्यंतदेवतानां पूजनं कर्त्तव्यं ॥ ततै
व कलशे मृत्युंजयमुमां च पूजयेत् ॥ ध्यानम् ॥ वृषसिंहस्थितं देवं हिमकुंदेंदु
सन्निभम् ॥ वामपार्श्वस्थितां देवीं द्विभुजां कलशां वराम् ॥ हेमाभरणभूषांगीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प॰पू॰ ५

श्वेताम्बरणभूषिताम् ॥ एवं मृत्युंजयं देवीं ध्यात्वा पापप्रणाशनम् ॥ नमः शंभवा
येति शिवम् ॥ देवीं दर्शयेति देवीम् ॥ आवाहनादि नमस्कार पर्यंतं संपूज्य ॥ तत्रै
व दिक्षोरराटे तिविष्णुं संपूज्य प्रार्थयेत् ॥ त्रैलोक्यपूजितः सौम्य सदा विजयव
र्द्धन ॥ शांतिं कुरु गदापाणे नारायण नमोस्तु ते ॥ इति प्रार्थयेत् ॥ तिथि-नक्षत्र-
दि कुंभादि योग-करण-ऋतुभ्यो नमः ॥ मास-राशि-मुहूर्त-वारेभ्यो नमः ॥ ततः
पीठादौ अक्षतपुंजेषु अष्टौ चिरजीविनः पूजयेत् ॥ प्रथम अक्षतपुंजे ऽक्षत
पुष्पं संस्थाप्य ॥ अश्वत्थाम्नो ध्यानम् ॥ श्यामवर्णं महातेजः खड्गपाणिं वरप्रदं

115

राम: ५

CC-0. In Public Domain. Digitization by eGangotri

अश्वत्थामानमाचार्यं ध्याये द्रोणसुतं शिवम्॥ द्रोणस्य सः पिता॥ आवाहनादि
यथालाभोपचारैः संपूज्य प्रार्थयेत्॥ ॐ ब्राह्मणाय नमस्तुभ्यं द्रोणाचार्यसुताय
वै॥ वेदवेदांगपूर्णाय अश्वत्थाम्ने नमो नमः इति प्रार्थयेत्॥ वलेः॥ इन्द्रनीलप्रभं
द्विबाहुं च मदा पाताल संस्थितम्॥ रत्नाभयकं ध्याये वलिनं वलदायकम्॥ ॐ
मही द्यौः॥ आवाहनादि प्रार्थना॥ भूमिं स्वर्गं च पातालं येन दत्तं द्विजन्मने॥
भविता यो मरावत्यां शक्रं तं वलिनं नमः॥ व्यासस्य॥ कंजकिंजल्कवर्णाभं सुपु
स्तकलसत्करम्॥ सर्वशास्त्रार्थतत्त्वज्ञं ध्याये व्यासमुनिं सदा॥ व्यस्य कू मो गृहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आवाहनादि॰ प्रार्थना ॥ सर्वशास्त्रार्थतत्वज्ञं वेदवेदांगपारगम् ॥ शास्त्रमूलप्र
वक्तारं पराशरसुतं भजे ॥ इतिप्रार्थयेत् ॥ हनूमतः ॥ वायुपुत्रं महावीरं रक्त
वर्णं त्रिलोचनम् ॥ कंदमूलफलप्रीतं हनूमंतं नमाम्यहम् ॥ आवाहनादि॰
प्रार्थना ॥ अंजनानंदनंवीरं जानकीशोकनाशनम् ॥ कपीशमक्षहंतारं वं
दे लंकाभयंकरम् ॥ इतिप्रार्थयेत् ॥४॥ विभीषणस्य ॥ पौलस्त्यकुलसंभू
तं कुंकुमाभं द्विबाहुकम् ॥ राक्षसौघैः परिवृतं सदा ध्यायेविभीषणम् ॥ रक्ष
सां भागोस्ति ॥ आवाहनादि॰ प्रार्थना ॥ लंकावासनमस्तुभ्यं पौलस्त्यकु

CC-0. In Public Domain. Digitization by eGangotri

लसंभव ॥ राक्षसाधिपते देव नमस्तेस्तु विभीषण ॥ इति प्रार्थयेत् ॥ ५ ॥ कृपस्य ॥ धनु
र्वाणधरं वीरं श्वेतपीतसमद्युतिम् ॥ भारद्वाजकुलोत्पन्नं कृपं ध्यायेमलापहम् ॥
अयर्द सहस्रमृषिभिः ॥ आवाहनादि प्रार्थना ॥ राजर्षभ नमस्तुभ्यं भारद्वाज
कुलोद्भव ॥ कृपाचार्य सत्यजुष्ठ धीरवीर पराक्रम ॥ इति प्रार्थयेत् ॥ ६ ॥ परशु
रामस्य ॥ जमदग्निकुलोद्भूतं व्योमांजनसमप्रभम् ॥ ध्यायेपरशुरामं वै दधानं
परशुं वरम् ॥ प्रजापतेनम ॥ आवाहनादि प्रार्थना ॥ कार्त्तवीर्यस्य हंतारं पाशहस्तं
महाबलम् ॥ एकविंशतिनिःक्षत्रं कुर्वंतं त्वां नमाम्यहम् ॥ इति प्रार्थयेत् ॥ मार्कं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष॰पू॰ ८

डेयस्य ॥ शरदिंदुनिभं शांतं द्विभुजं तं वाप्रदम् ॥ कृत्वाऽभयकरं ध्यायेमार्कंडेयं
महामुनिम् ॥ सप्तऋषयः ॥ आवाहनादिः प्रार्थना ॥ वटवृक्षसमारूढं सद्वृत्तं
व्रलाचितकम् ॥ ऋषिवृंदशतैर्युक्तं मार्कंडेयं नमाम्यहम् ॥ इति प्रार्थयेत् ॥ ८ ॥
अथ षष्ठिकापूजा ॥ ॥ गोमयप्रतिमायां अष्टदलमध्येऽक्षतपुंजे वा॰ स्वस्व 117
संप्रदायानुरोधेन पूजयेत् ॥ ध्यानम् ॥ चतुर्भुजां महादेवीं तुंगपीनपयोधराम् ॥
मयूरवाहनारूढां रक्तवस्त्रधरांऽभाम् ॥ शूलशक्तिवराऽभीतिहस्तां ध्यायेम
हेश्वरीम् ॥ ॐ अम्बे अम्बिके इति मंत्रेणावाहनादि नैवेद्यांतं प्रपूजयेत् ॥ ॐ ब
ॐ अम्बे अम्बिके म्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्

राम: ८

CC-0. In Public Domain. Digitization by eGangotri

ष्ठिके सायुधे स वाहने स परिवारे· इहागच्छ· इह तिष्ठ· इह सन्निहिताभव· मम
पूजां गृहाण ॥ आवाहिवा देवि विमहा षष्ठीति विश्रुता ॥ शक्तिभिः सह पुत्रं मे र
क्ष वासा जागरे ॥ इत्यावाह्य· प्राणवेन करांगन्यासो ॥ तद्यथा ॥ ॐ अंगुष्ठाभ्यां
नमः ॥ ॐ तर्जनीभ्यां॰ ॐ मध्यमाभ्यां॰ ॐ अनामिकाभ्यां॰ ॐ कनिष्ठिकाभ्यां॰
ॐ अस्त्राय फट् ॥ ततोऽर्घ्यः ॥ पत्रपुष्पफलानां भोभी रत्नैश्च वहुभिर्युतम् ॥ षष्ठि
देवि मयादत्तमर्घ्यं गृहाण नमोस्तु ते ॥ आचमनम् ॥ सर्वलोकस्य रक्षार्थं सिद्धासा
न्निध्यकारिणि ॥ गृहाण षष्ठिके देवि इदमाचमनीयकम् ॥ स्नानम् ॥ कावेरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नर्मदा कावेरी तुंगभद्रा सरस्वती॥ गंगा च यमुना चैव ताभ्यः स्नानार्थमाहृतम्॥
गृहाणाषष्ठिके देवि स्नानाय श्रद्धया जलम्॥ ततः पंचामृतस्नानम्॥ ॐ पयः
पृथिव्याम्॥१॥ दधिक्राव्णः॥२॥ घृतम्मिमिक्षे॥३॥ मधुवाता॥४॥ अपा छेर
सम्॥५॥ स्नानान्ते आपोऽअस्मान्निति शुद्धस्नानम्॥ वस्त्रम्॥ तन्तुसंतानसंयुक्तं
कलाकौशेयकल्पितम्॥ सर्वांगाभरणश्रेष्ठं वसनं परिधीयताम्॥ चंदनम्॥ सकुं
कुमं चंदनं च कर्पूरादिसमन्वितम्॥ षष्ठिदेवि मया दत्तं धारयस्व यथासुखम्॥
अक्षताः॥ अक्षन्नमीमदंतेति अक्षताः॥ काण्डात्काण्डेति दूर्वा॥ पुष्पम्॥ धूपं

118

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णानि पुष्पाणि सुगंधीनि विशेषतः॥ मया दत्तानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥
सिंदूरम्॥ सिंदूरं तारकगुणान्वितं च सुकंठसूनेर्णा हरिद्रया च॥ गृहाण गोश्वरि
कुंकुमं तत्सौभाग्यपदं नूतनमंगलं यत॥ धूपम्॥ गुग्गुलं घृतसंयुक्तं दशांगेन सम
न्वितम्॥ घ्राणतुष्टिदं देवि मया दत्तं धूपं मे प्रतिगृह्यताम्॥ दीपम्॥ गव्येनाज्येन संपूर्णं
वर्त्या कर्पूरगर्भया॥ दीपं देवि मया दत्तमिमं गृह्ण नमोस्तु ते॥ मोदकम्॥ मोद
कानि विचित्राणि पक्वान्नानि दधीनि च॥ विचित्ररससंयुक्तं तथा पूगलमन्वि
तम्॥ फेणिकां घृतपूराढ्यां नैवेद्यं प्रतिगृह्यताम्॥ मूलमंत्रेण पुनराचमनीयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तांबूलम्॥ कर्पूरैलालवंगादिपूगीफलसमन्वितम्॥ तांबूलं कल्पितं भक्त्या गृ
हाण षष्ठिके नमः॥ नारिकेलपूगीफलादिनानाविधफलान्यपि॥ याः फलि
नीरिति मंत्रेण॥ ॐ षष्ठिकायै नमः॥ उपायनद्रव्यम्॥ हिरण्यगर्भगर्भस्थं हेम
बीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ नीराजनम्॥ अंत
स्तेजो बहिस्तेजो ह्येकीकृत्यामितप्रभम्॥ आरार्त्तिकमयादत्तं गृहाण मदनुग्र
हात्॥ क्षमापनम्॥ पुष्पांजलिं विधाय॥ शक्तिस्त्वं सर्वदेवानां लोकानां हित
कारिणि॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तु ते॥ रुद्राणीरुद्ररूपेण महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विघ्नविनाशिनि॥प्रसन्नवरदे देवि बुलाणी त्वं व्यवस्थिता॥ इंद्रशक्तिः समा

ख्याताम हाषष्ठि नमोस्तुते॥गौरी पुत्रो यथा स्कंदः शिशुः संरक्षितः पुरा॥त

थेमंममबालंहि रक्ष त्वं षष्ठिके नमः॥अथ प्रार्थना॥पुरा देवैः पूजितासि ब्र

ह्मविष्णुशिवादिभिः॥आवाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम॥देह्यस्य

बालकस्याद्य दीर्घमायुः नमोस्तुते॥बालकस्य पिता पश्चात्ततः देव्याः पुरःस्थि

तः॥बद्धांजलिर्भक्तिनम्रो वाचमुच्चारयेद्धुतम्॥अथ बालक पितुः प्रार्थना॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंदेविमातादितिरद्रिजात्वंगौरीत्वमेवासिधृतिःक्षमात्वम्॥कीर्त्तिःसमृ
द्धिर्भुवनस्यधात्रीत्वमेवदेविप्रणतोस्मितुभ्यम्॥यथासर्वाणिभूतानित्व
यिसूतानिरत्नवत्॥चराचराणिभूतानित्वयिस्थूलान्यशेषतः॥पुमान्
साक्षीभवत्येषतेनसत्येनबुद्धिमान्॥त्वंसृष्टिरास्थास्तजासिप्रजात्वंस्थि
तिस्त्वमेवासकलान्बिभर्षि॥त्वमेवहंसिक्रियतेनवाचासमर्थ्यव्याप्य
जगन्तिभास्वराद्युः॥स्वस्तिमेस्तुगृहेनित्यंत्वत्प्रसादात्सुरेश्वरि॥पुत्रोत्सव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महंनित्यंपश्यपेयंत्वदनुग्रहात्॥ ततोजननीप्रार्थना॥ ततोर्भकस्यजननी प्रार्थये
नामतिंद्रिना॥ नवप्रसादात्तनयस्पवक्रं दृष्टं मयादेविनमोनुभ्यम्॥ सौभाग्य
मारोग्यमभीष्टसिद्धिंदेहिप्रजायाश्चिरजीवितांच॥ गौर्याः पुत्रोयथास्कंदःशि
शुःसंरक्षितस्त्वया॥ तथाममाप्ययंबालोरक्षतांषष्ठिकेनमः॥ अथसर्वेबांधवा
बालस्यायुःप्रार्थयंति॥ सर्वेचतेबांधवाश्चस्वस्तिवाक्यपुरःसरम्॥ कामयंतोऽ
र्भकस्यायुःप्रार्थयंतःसमायोजितः॥ जननीसर्वसौख्यानांवर्द्धिनीकुलसंपदाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनी सर्वसिद्धीनां जन्मदे त्वां नतावयम्॥ ततः षष्ठिकायै व्यजनेन कुर्याद्बालनि
वेदनम्॥ देवतानामृषीणां च भक्तानां भक्तवत्सले॥ अर्पितं रक्षमे पुत्रं महाषष्ठि
नमोस्तुते॥ जननी सर्वभूतानां बालकानां विशेषतः॥ नारायणी स्वरूपेण पु
त्रं मे रक्ष सर्वतः॥ भूतप्रेतपिशाचेभ्यो डाकिनीभ्यो विशेषतः॥ कुतंते स्वकुतंम
त्वा रक्षारक्ष वरानने॥ एवं रक्ष महाषष्ठि सदा त्वं विघ्ननाशिनि॥ बालं मम सदा र
क्षनित्यं मत्कुक्षिसंस्थितम्॥ सर्वभूतहिते मातर्जगतत्कृपकारिणि॥ सर्वतः

षष्ठिरूपेण बालं रक्षां कुरुष्व मे॥ षष्ठिदेवि महाभागे हिताहितवरप्रदे॥ त्वत्प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बालापामार्जनम्॥ माधुरं च दलं यत्र विल्लोर तुल नेजसः॥ रहस्यं पदलं यत्र सर्वं भवन्ति सूनेः २

सादादविघ्नेन चिरंजीवन्तु बालकः॥ अस्मिन्प्रसूतिकागारे देवीभिः परिवारिते॥ र
क्षां कुरु महाभागे सर्वविघ्नविनाशिनि॥ अयं मम कुलोत्पन्नो रक्षार्थं तव पादयोः॥
नीतो मया महाभागे चिरंजीवन्तु मे सुतः॥ अथ स्कंदपूजा॥ ध्यानम्॥ वराभय
करः साक्षाद्द्विभुजः शिखिवाहनः॥ किरीटी कुंडली देवो दिव्याभरणभूषितः॥ ॐ
ध्यस्व स्कंदेति मंत्रेणावाहनम्॥ ॐ स्कंद इहागच्छ इह तिष्ठेत्यावाह्य॥ पाद्यं॥ अर्घ्यं
आचमनीयम्॥ स्नानीयम्॥ पुनराचमनीयम्॥ वस्त्रम्॥ यज्ञोपवीतम्॥ गंध-पु
ष्पाक्षत-धूप-दीप-नैवेद्य-तांबूल-द्रव्यादिकं स्कंदाय नमः॥ ततः प्रार्थना॥ कान्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केयमहाबाहो गौरीहृदयनंदन ॥ कुमारं रक्षमे भीत्या सहिदेव नमोऽस्तु ते ॥ ततः
स्तुतिः ॥ नमः कुमाराय महाप्रभाय स्कंदाय ते स्कंदितदानवाय ॥ नवार्कविंब
द्युतये नमोऽस्तु ते नमोऽस्तु मोघोघुमशक्तिधाराये ॥ नमो विशारदाय विशाखिसो
नमो नमोऽस्तु ते षण्मुख कामरूपिणे ॥ गुहाय गूढाभरणाय भर्त्रे नमो रणोद
नवदारणाय ॥ नमोऽस्तु तेऽर्कप्रतिमप्रभाय नमोऽस्तु गुह्याय गुहाय तुभ्यम् ॥
नमोऽस्तु ते लोकभयावहाय नमोऽस्तु ते बालपराक्रमाय ॥ नमो विशालायतलो
चनाय नमो विशालाय महाव्रताय ॥ नमो नमस्तेऽस्तु मनोरमाय नमो नमस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुकोत्कटाय॥ नमोमयूरोज्ज्वलवाहनाय नमोस्तु केयूरधराय तुभ्यम्॥ नमो
ध्वतोदग्र पताकिने नमो नमः प्रभाय प्रशान्तायते स्तु॥ सेनान्ये पावकिने नमो
स्तु रूपापरीतामलदीव्यमूर्तये॥ अथ वंश पूजा॥ यथालाभोपचारैर्वंशं सं
पूज्य॥ प्रार्थयेत्॥ सर्वमंगलमांगल्य गोविंदस्य करे स्थितः॥ वंशाव ... य मे वं
श सदानंद नमो स्तु ते॥ खड्ग पूजा॥ यथालाभोपचारैः खड्गं संपूज्य॥ प्रार्थ
येत्॥ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः॥ श्री गर्भो विजयश्चैव धर्मा
धारस्तथैव च॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा॥ नक्षत्रं कृत्तिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेत्रे गुरुर्देवो महेश्वरः॥ रोहिणां च शरीरं ते दैवं चैव जनार्दनः॥ पितापितामह
होदेव त्वं मां पालय सर्वदा॥ इयं तेन धृता क्षोणी हतश्च महिषासुरः॥ तीक्ष्ण
धाराय शुद्धाय तस्मै खड्गाय ते नमः॥ अथ मातृका पूजा॥ अक्षतपुंजेषु॥ गौरी १
पद्मा २ शची ३ मेधा ४ सावित्री ५ विजया ६ जया ७ देवसेना ८ स्वधा ९ स्वाहा १०
मातरः ११ लोकमातरः १२ धृतिः १३ पुष्टिः १४ तुष्टिः १५ आत्मनः कुलदेवता १६
यथालाभोपचारैः पूजयेत्॥ अथ षट् स्मृतिका पूजा॥ तथैवाक्षतपुंजेषु॥ शि
वा १ संभूतिः २ कीर्त्तिः ३ सन्नतिः ४ अनसूया ५ क्षमा ६ प्रणवादिनमोन्तनाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रेण पूजा कार्या ॥ ततः कुशादीन्यादाय ॥ अस्यां रात्रौ मम अभिनव जात कुमार
स्य नैरुज्य पूर्वक दीर्घायुष्य कामनया गंधपुष्पाक्षतधूपदीपतांबूल
पक्वान्न परमान्न पूरिका पिष्टान्न नैवेद्यानि भगवत्यै षष्ठी देव्यै पूजित समस्त
देवतायै सपरिवारायै समुदितायै मयोत्सृष्टानि प्रीयंतां न मम ॥ अथ ब्रह्मस्ना
नम् ॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ स
मिमं दधातु ॥ विश्वे देवास इह मादयंतामोꣳ३ प्रतिष्ठ ॥ १ ॥ सूर्यरश्मिर्हरिके
शः पुरस्तात्सविता ज्योतिरुदयाꣳ अजस्रम् ॥ तस्य पूषा प्रसवे याति विद्वान्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष.पू.
१४

म्यश्यन्विश्वा भुवनानि गोपाः॥३॥सोमो धेनुम्॥३॥पितृभ्यः स्वधायिभ्यः॥४॥ॐ
प्रजापतेन॥५॥ॐ वातो वा॥६॥ॐ नमः शंभवाय॥७॥ॐ त्वानारभिन्दुम्॥८॥
ॐ नमोस्तु सर्पेभ्यः॥९॥ ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देव
ता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृ
हस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥१०॥ ब्रह्मजज्ञानम्॥११॥ रक्षोहणा
मिति धारणमंत्रः॥ अथ षष्ठदिने बालग्रहहरणम्॥ प्रयोगसारे॥ षष्ठे दिने
वर्फे स्कारी ग्रहीग्रस्ताति बालकम्॥ तच्चे ष्ठागात्र विक्षेपो हास्यरोदनमोह

षष्ठः
१४

१२४

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम्॥१॥कुष्टगुग्गुलसिद्धार्थगजदंतैर्घृतेनच॥धूपयेद्दने पयेद्धापि ततोमु
च्यतिसाग्रही॥२॥वलिमंत्रश्च नारायणीये॥दधि भक्त मत्स्यमांसादि साधि
त वलिमादायबालकोपरि भ्रामयेद नेन मंत्रेण॥ॐ फेत्कारिणि कुष्मांडि भ
गवति भुराणिणि समंडिते मुंच२ दह२ पच२ मार२ गच्छ२ स्वाहा॥इति मंत्रेण
बालकोपरिभ्रामयित्वा चतुष्पथे क्षिपेत्॥वटकाष्ठकमालाभिर्वद्ध्ग्रीव मजा
तनम्॥पुनः पुनर्महाशङ्कारयेत्कर्णताडनात्॥भूतप्रेतपिशाचाश्च याः
धानाश्च शाकिनी॥बालग्रहाश्च नश्यंति तच्छब्दात्कर्णताडनात्॥छागवंधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क·पू·
१५

उत्तरे द्वारे ॥ कुशलंच द्वारदेशे स्थापनम् ॥ ततः शस्त्रपाणिभिः पुरुषैर्जाग्रद्भिः
सूतिकारक्षार्थं द्वारदेशे स्थापयेत् ॥ मंथानपूजा ॥ यथालाभोपचारैः सं
पूज्य प्रार्थयेत ॥ मंथानकत्वं हि गोलोके देवदेवेन निर्मितः ॥ पूजितस्त्वं विधा
नेन सूतिरक्षां कुरुष्व मे ॥ अथ जातहारिणी मातरः पूज्याः ॥ यथालाभोप
चारैः संपूज्य प्रार्थयेत ॥ जातं हरंति या बालं मातरो गूढविग्रहाः ॥ अ
भिरक्षंतु मे पुत्रं बलिपूजां हरंतु ताः ॥ गीतवाद्यविनोदेन नृत्येन च वसुधि
प्तिर ॥ रात्रौ जागरणं कुर्यात् देवतेनां द्विजैः सह ॥ ततः स्नानादि देयानि ब्रा

रम:
१५

CC-0. In Public Domain. Digitization by eGangotri

लिरोभ्योयथाविधि ॥ वस्त्रस्वर्णान्नदानेनषष्ठीमेप्रीयतामिति ॥ प्रभातेदी
पतेदानं नटनर्त्तकगायने ॥ स्त्रियस्सभर्तृकाः पूज्या वासोऽलंकरणादि
भिः ॥ अनेनविधिनायस्तु षष्ठींदेवींप्रपूजयेत् ॥ आयुर्वृद्धिर्भवेत्तस्यसंतते
रपिपांडव ॥ ततोदक्षिणा ॥ ॐ अद्येहेत्यादि देशकालौ संकीर्त्यअद्यकृते
तदमुकगोत्रस्यामुकशर्मणोमम अभिनवजातवालकस्यायुर्वृद्धिपूर्व
कोत्तरोत्तरहर्षविजयप्राप्त्यर्थं वालग्रहदशावांतर्दशानिवारणार्थं षष्ठी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष·पू·
१६

पूजामहोत्सवकर्मांगतया षष्ठिकादिदेवतापूजासांगतासिद्ध्यर्थं दक्षिणा
मिमां भूयसीं हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं यथाद्रव्यं यथानामदै
वतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे॥
ततो हरिद्रारसेन श्रीविलोर्वा दशनामानि वस्त्रे लिखित्वा बालकमातुर्ल
लाटे बध्नीयात्॥ ॐ केशवः१ ॐ नारायणः२ ॐ माधवः३ ॐ गोविंदः४ ॐ विष्णुः५
ॐ मधुसूदनः६ ॐ त्रिविक्रमः७ ॐ वामनः८ ॐ हृषीकेशः ९ ॐ पद्मनाभः१०

राम:
१६

126

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ दामोदरः ११ ॐ पुरुषोत्तमः १२ ॥ ततः पूजितदेवताः क्षमध्वमिति विसर्ज्य ॥
यांतु देवगणाः १ ॥ गच्छगच्छ सुर २ ॥ इति पठित्वा अभिषेकपाठपूर्वकमा
शीर्वादं ब्राह्मणेभ्यो गृहीत्वा तान्भोजयेत् स्वयं च पश्चात्तु दुग्धेनो भुंजी
त ॥ ततः सर्षपपोटलिकाकांडेन ताडयेत् ॥ ततः सर्वे स्तनकं मन्यंते
न खादंति न पिबंति इति देशाचारः ॥ ॥ इति भविष्योत्तरोक्तषष्ठीपूजा
विधिः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥ शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu